बभूव आसचकार चक्रे। कर्त्तयते अकर्त्तिं—अकर्त्तिषा-ताम्-अकर्त्तयिषाताम्। प्रनिकर्त्तयति। क्त कर्त्तितः।

**कर्त्रभिप्राय** पु॰ कर्त्तारमभिप्रैति संबध्नाति अभि+प्र+इण—अण् उप॰स॰। १कर्त्तृसम्बन्धिनि। “स्वरितञितः कर्त्त्रभिप्राये क्रियाफले” पा॰। अत्र क्रियाफलस्वरूप-ञ्चास्माभिःशब्दार्थरत्ने निरूपितं यथा।

‘स्वरितञिद्धातूत्तरतङः कर्तृगामिन्येव सति क्रियाफले कर्तृवाचकत्वं नान्यथा तत्र फलञ्च न धातूपस्थाप्यं जानात्यादीनां ज्ञानरूपफलस्य समवायेन कर्तृनिष्ठतया सर्व्वदैव जानीते इत्येव प्रयोगापत्तेः जानातीत्यादेरप्रयोगापत्तेश्च नेष्यते तु तथा शास्त्रकारैः। नापि क्रियाजन्यवेतनदक्षिणादिरूपलाभादि गौणं फलमिह विवक्षितं तथा सति सूदादेस्तादृशफलवत्त्वेन सूदः पचते ऋत्विजो-यजन्ते इत्यादिप्रयोगापत्तेः। किन्तु फलतीतिव्युत्पत्त्या प्रयोजनापरनामकक्रियाजन्यदृष्टस्वर्गादिरूपमेव मुख्यं फलं ग्राह्यं यथोक्तं हरिणा “यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः। तत् प्रधानं फलं तासां न लाभादि प्रयोजनमिति”। प्रसिद्ध्यर्थं निष्पत्त्यर्थं पचादयः पाकादयःतासां पचादीनां प्रधानं फलं तदित्यर्थः फलस्य प्राधान्यञ्चेतरापेक्षया बोध्यं तेन इतरेच्छानधीनेच्छाविषयत्वस्य तस्य सुखादिष्वेव सत्त्वेऽपि क्वचित् साक्षात्सुखादिरूपप्रयोजनालाभे तत्साधनरूपेतरफलस्यापि ग्रहणमिति द्रष्टव्यम् तेन “अपह्नुवः”पा॰इत्यादिसूत्रविहिततङः सुखादिरूपमुख्यप्रयोजनाभावेऽपि कर्तृवाचकत्वम्”।

कर्त्तुरभिप्रायो यत्र। २कर्त्तुरभिप्रायविषये त्रि॰ उक्त पाणिनिसूत्रस्य “आत्मनेपदमपि कर्त्रभिप्रेतक्रिया फलमात्रजनकत्वेनेति”शब्दचि॰ व्याख्यानात्तदर्थता अत एव पा॰ सूत्रस्योभयार्थता। तदेतत्शब्द॰ प्र॰विवृतं यथा “अत्रोभयपदिधातूनां यत्र क्रियाफलं कर्तृनिष्ठं तत्रात्मनेपदं यत्र च कर्तृभिन्ननिष्ठं तत्र परस्मैपदं साधु “स्वरितञितः कर्त्रभिप्राये क्रियाफले”इति सूत्रेण कर्त्तारमभिप्रैति सम्बध्नातीति व्युत्पत्त्या कर्तृसम्बद्धे क्रियाफल एवात्मनेपदस्य विधानात्। अतएव “स्वरिञ्जिण्यन्तधातूनां कर्तृनिष्ठे क्रियाफले। आत्मनेपदमुद्दिष्टं तदनिष्ठे पदान्तरम्”इत्यापिशालीयाः पठन्ति। तदनुसृत्यैव दानादिस्थले स्वगते फले ददे इत्येवं, परगते तु ददानीत्येव वाक्यं प्रयुञ्जते वृद्धाः। “स्वर्गकामोयजेत”इत्यादौ च सामान्यतः श्रुतमपि फलं कर्तृनिष्ठमेव “शास्त्रदेशितं फलमनुष्ठातरीति” मीमांसयोत्सर्गतस्तथा कल्पमादिति प्राहुः। चिन्तामणिकृतस्तु यत्र क्रियाफले कर्त्तुरभिप्रायइच्छा तत्रैवात्मनेपदमिति सूत्रार्थस्तेन याजकाद्यैर्दक्षिणादिलाभेच्छयैव यागादिकरणे यजन्ति याजकाः पठन्ति पाठकाः इति परस्मैपदम्। परगतस्यापि यागादिफलस्येच्छया तत्करणे तु यजन्ते याजकाइत्यादिकः साधुरेव प्रयोगोऽतएव “पितृस्वर्गकामः पुष्करिण्या यजेत” इत्यादावप्यात्मनेपदम् “धनकामोगणपतिं मुक्तिकामोऽर्च्चयेद्धरिम्” इत्यादौ च परस्मैपदं सङ्गच्छते” इत्याहुः। [अकर्द्दीत् चकर्द प्रनिकर्दति।

**कर्द्द** कुत्सितरवे उदरशब्दे च भ्वा॰पर॰अक॰सेट्। कर्द्दति

**कर्द्द** पु॰ कर्द्द—अच्। कर्द्दमे। शब्दर॰।

**कर्द्दट** पु॰ कर्द्दं कर्दमं कारणत्वेनाटति प्राप्नोति अट—अच् ईत॰ शक॰। १करहाटे पद्मकन्दे २कर्द्दमगन्तरि त्रि॰। मेदि॰। कर्द्द—अटन्। ३पङ्के पु॰मेदि॰।

**कर्द्दन** न॰ कर्द्द—भावे ल्युट्। उदरशब्दे हेमच॰।

**कर्द्दम** पु॰ कर्द्द—अम। (कादा) १पङ्के अमरः। “सरितः कुर्वती गाधाः पथश्चाश्यानकर्द्दमान्”रघुः। करणे अम। २पापे उणादिकोषः। तस्य कुत्सितशब्दहेतुत्वात्तथात्वम्। ३मांसे न॰ शब्दचि॰। तत्सेवने हि उदरशब्दोजायते इति तस्य तथात्वम्। कर्दमश्छाया कारणत्वेनास्त्यस्य अर्श॰ अच्। ब्राह्मणश्छायाजाते ४प्रजापतिभेदे। ‘छायायाः कर्द्दमोजज्ञे देवहूत्याः पतिः प्रभुः” भाग॰ ३,१२,१४, “प्रजाः सृजेति भगवान् कर्द्दमो ब्रह्मणोदितः। सरस्वत्यास्तपस्तेपे सहस्राणां समा दश। ततः समाधियोगेन क्रियायोगेन कर्द्दमः। संप्रपेदे हरिं भक्त्या प्रपन्न वरदाशुषम्” भाग॰३,२१,अष्टमश्लोकादौ। ततः कपिलस्य प्रादुर्भावोवर्णितः। तन्नामनिरुक्तिः” ब्रह्मवै॰ पु॰ब्र॰ख॰ दर्शिता यथा। “वेदेषु कर्दमः शब्दश्छायायां वर्त्तते स्फुटम्। वभूव कर्दमाद्बालः कर्दमस्तेन कीर्त्तितः”। तेन ५छायायामपि। ततः ऋश्यादि॰चतुरर्थ्यां क। कर्दमक पङ्कसन्निकृष्टदेशादौ त्रि॰ कर्दमोजातोऽस्य तारका॰ इतच्। कर्दमित जातकर्दमे त्रि॰। अर्श॰ मत्वर्थे अच्। कर्दम ईकर्दमयुक्ते त्रि॰। काश्या॰चतुरर्थ्यां ठञ्ञिठौ कार्दमिक कर्दमसन्निकृष्टदेशादौ त्रि॰ ठञि स्त्रियां ङीप्। मत्वर्थे इनि कर्द्दमिन् पु॰तद्युक्ते त्रि॰ सुश्रुतश्च पु॰ वैद्य॰ तस्य कर्दमसमीपजातत्वात्तथात्वम्। पृषो॰ कर्द्दमीत्यपि तत्रार्थे।

**कर्द्दमक** पु॰ कर्दमे कायति प्रकाशते कै-क। शालिभेदे,